नं० १०८८-घ

अङ्गिरः स्मृतिः (धर्मशास्त्रम्)

पत्राणि ६ (सम्पूर्णम्)

नं० १०८८-घ

६ पत्रे

अं
१

ॐश्रीगणेशायनमः ॐधर्मजिज्ञासवः सम्यगमिसौज्जामहाद्युतिः भारद्वाजादिभिः पृष्टः प्राब्र
वीदेतदंगिराः १ आश्रमेषु च सर्वेषु वर्णानामनुपूर्वशः प्रायश्चित्तविधिं कृत्स्नं वक्ष्यमाणं निबोधत २
अन्त्यानामविशेषेण जग्ध्वान्नं हि द्विजन्मनां चांद्रं कृच्छ्रं तदर्धं च ब्रह्मक्षत्रविशां स्मृतं ३ चांडालकूप
भांडेषु यस्त्वापः पिबते द्विजः प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्दिशेत् ४ चरेत्सांतपनं विप्रः प्राजाप
त्यं तु भूमिपः तदर्धं तु चरेद्वैश्यः पादं शूद्रः समाचरेत् ५ चंडालोदकभांडेषु यः पिबेत्तृषितो जलं तत्क्ष
णं तत्स्मृतार्धं प्राजापत्यं समाचरेत् ६ यदि वाऽनुव्रते तोयं शरीरे तस्य जीयति तदा विप्रः स्वयश्चार्थं
कृच्छ्रं सांतपनं चरेत् ७ चंडालभांडसंस्पृष्टं पिबेच्चेत्तृषितो जलं गोमूत्रयावकाहारास्त्रिरात्रेण विशु
८ ध्यति यस्तु चंडालसंस्पृष्टं पिबेत्तोयमकामतः स तु सांतपनं कृच्छ्रं चरेच्छुध्यर्थमात्मनः ९ कृते मूत्रपुरी
षे तु भक्तो ह्युच्छिष्टोऽथवा द्विजः श्वादिस्पृष्टो जपेत्स्नात्वा गायत्र्याश्च शतद्वयं १० कूपे विण्मूत्रसंयुक्ते पी
त्वा तोयं द्विजोत्तमः कृच्छ्रं सांतपनं कृत्वा त्रिरात्रेण विशुद्ध्यति ११ बलाकाभासगृध्राश्च खरश्च श्ववकसू
कराः दृष्ट्वा चैषाममेध्यानि स्पृष्ट्वा चाप्यविशुद्ध्यति १२ इक्षयैषाममेध्यानि भक्षयित्वा द्विजः तपः कृच्छ्रं
सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया १३ एतदेव व्रतं कुर्युः एषां मांसस्य भक्षणे श्वकाकयोश्च मांसानि भ १

काचांद्रायणंचरेत् १४ स्पर्शनेनैवऊरुते ब्राह्मणोब्राह्मणैःसह आकृतुशांखलिखितौविण्मूत्रोच्चारभो
जने १५ तैलिकाचोपधानंवपुष्पंरक्तांबराणिच वहेदंचतथास्पृष्ट्वा शुद्धेदाचमनाद्विजः १६ संस्पृष्ट
मिहकिंचिष्टैरेकरात्रंपयःपिवेत् संस्पृष्टश्चैवनात्रकिंचिष्टउपोष्यत्रिदिनंत्यजेत् १७ भक्ताचैवांसपुच्छिष्ट
विप्रःसांतपनंचरेत् पादोनमर्द्धपादंचतत्रविट्शूद्रयोनरः १८ यस्तुभार्यांश्वपाकस्यब्राह्मणोऽलपि
गच्छति सचैलोजलमाप्लुत्यघृतंप्राश्यविशुद्ध्यति १९ सचोदक्यादिभिस्पृष्टोयदास्याद्दान्तुरोनरः अना
तुरास्सप्तवारंस्पृष्ट्वास्नानंसमाचरेत् २० आतुराचैवयानारीरजसापलिनीभवेत् चतुर्थेहनिसं
प्राप्तेस्पृष्ट्वातामप्यनातुरः २१ दशैकादशवारान्वास्नानंकुर्याद्विचासकृत् पवंतस्याविशुद्धिस्यान्परि
वर्तितवाससः २२ प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत् नतेनतद्व्रतंतासामुपहन्येतकर्हिचि
त् २३ स्वभावपघनारीणांतेयामूत्रपुरीषवत् अतऊर्ध्वनदुष्यंतिचरेदुश्चैवतद्व्रतं २४ चंडालपतितादि
प्रा कांस्पृष्टोच्छिष्टोद्विजोत्तमः नापत्यंचरेत्कृच्छ्रंसुमंतवचनंयथा २५ चंडालपतितादीनामुच्छिष्टान्नस्य
भोजने द्विजःशुद्ध्येत्पराकेणशूद्रःकृच्छ्रेणशुद्ध्यति २६ पतितानांस्त्रियोगत्वाभुक्ताचप्रतिगृह्यच मासो
पवासंकुर्वीतचंद्रायणमथापिवः २७ श्वगर्दभववादीनां शोणमांसादिहृदयौ उद्धरेत्सकलांवारिकूप

प्र॰ वापीपिबतो भतं २८ यस्तु कूपे पिबेत्तोयं ब्राह्मणः शवदूषिते अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति २९
२ च्छिन्नभिन्नशवव्याप्तं वारि विप्रो यदा पिबेत् शुद्धिं चांद्रायणं तस्य तप्तकृच्छ्रं तथापि वा ३० अतऊर्द्ध्वं प्र॰
वक्ष्यामि नीलीशौचस्य यो विधिः स्त्रीणां क्रीडार्थसंभोगे शयनीये न दुष्यति ३१ संध्यास्नानं जपो होमः
स्वाध्यायः पितृतर्पणं वृथा तस्य महायज्ञा नीलीरक्तस्य धारणात् ३२ पालनाद्विक्रयाच्चैव नीलीवृ
त्त्युपजीवनात् पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुद्ध्यति ३३ नीलीरक्तं यदा वस्त्रं विप्रो देहेषु धारये
त् अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति ३४ नीलीमध्ये यदा गच्छेत् प्रमादात् ब्राह्मणः क्वचित् अ
होरात्रोषितः स्नात्वा पंचगव्येन शुद्ध्यति ३५ नील्याचोपहते देत्रे सस्यं यत्र प्ररोहिति अभोज्यं तद्द्विजा
दीनां भुक्त्वा चांद्रायणं चरेत् ३६ वापयेद्यत्र नीलीं तु तावत्स्यादशुचिर्मही प्रमाणं द्वादशसमा अत
ऊर्द्ध्वं शुचिर्भवेत् ३७ मृते भर्तरि या नारी नीलीवस्त्रं तु धारयेत् स्वामी निष्पतति पाताले नीलीवस्त्र
धारणात् ३८ पत्यौ जीवति या नारी उपोष्य व्रतचारिणी आयुर्वै हरते भर्तुः सा नारी नरकं व्रजेत् ३९ स्ना
ने रजस्वला यस्तु चतुर्थेऽहनि शुद्ध्यति कुर्याद् रजसि निर्वृत्ते नेनानिर्वृत्ते कथंचन ४० रजस्वलायाः प्रेता
याः संस्कारादीनि नाचरेत् ऊर्ध्वं त्रिरात्रे स्नाताया शवधर्मेण दाहयेत् ४१ रोगेण यद्रजः स्त्रीणां मत्य। २

तं संप्रवर्त्तते आशुचत्वात्स्नानं नेन स्पृश्यतासां वैकारिको मदः ४२ स्वाध्याचारान्ननावत्सा रजो यावत्प्रवर्त्तते
निवृत्ते रजसि साध्वी स्यात् गृहकर्मणि चेंद्रिये ४३ प्रथमेहनि चंडाली द्वितीये ब्रह्मघातनी तृतीये रज
की प्रोक्ता चतुर्थेहनि शुद्ध्यति ४४ चंडालः श्वपचो वापि पयाचेयौ स्त्रिस्पृशेत् अफालकृष्टैर्तेन प
चगव्येन शुद्ध्यति ४५ रजस्वला तु संस्पृष्टा चंडालांत्यश्ववायसैः तावत्तिष्ठेन्निराहारा स्नात्वा काले
न शुद्ध्यति ४६ रजस्वले यदा नार्यौ अन्योन्यं स्पृशतः क्वचित् सवर्णा पंचगव्येन तु त्रिरात्रमसवर्णके ४७ उ
च्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला पूर्वाः कृच्छ्रप्रउवीरत्तु शूद्रा दानेन शुद्ध्यति ४८ नियमस्था
यदा नारी प्रपश्येद्नरा रजः उपोष्यैव तु सा रात्रीं शेषं स्नाना च रेत् ४९ आतुरे स्नान उत्पन्ने दशकृ
त्वस्त्वनातुरः स्नात्वा स्नात्वा स्पृशेदेनं ततः शुद्ध्येत्स आतुरः ५० सूतके मृतके गर्भे शौचकार्ये स्नानं च मैथुनेः
स्मृतं स्वप्ने अश्रुपातोन्तसरदाऊर्ध्वं शौचं मूत्रपुरीषवत् ५१ द्वावेतावशुचीस्यातां दंपती शयने गतौ शयना
दुत्थिता नारी शुचिः स्यादशुचिः पुमान् ५२ रजसा शुद्ध्यते नारी न च दूष्योद्धवर्णितो यथा ग्राम मल
ग्राही नदी वेगेन शुद्ध्यति ५३ बहूनां संहतानां च पयचेकाग्रतुर्ध्यवेत् नस्य पात्रस्य तक्रौ चैते नरेषाक
५४ तं च न भस्मना शुद्ध्यते कांस्यं ताम्रमाप्नलिप्यते स्त्रावित्तमूत्रसंस्पृष्टं शुद्ध्यते तापलेखनैः गवाघ्रा ५५

श्रे
२
3

तानि कांस्यानि शूद्रोच्छिष्टानि यानि च शुद्ध्यंते दशभिः क्षारैः एवं काकोपहतानि च ५६ शुद्धिः स्वर्णरूप्या
णां मारुतार्केंदुरश्मभिः गंडूषपादशौचं च कृत्वा कांस्यस्य भाजने ५७ भूमौ निक्षिप्य षण्मासान् पुनरा
कारमादिशेत् निर्लेपं कांचनं भांडमद्भिरेव विशुद्ध्यति ५८ आमिषाभिरसस्पृष्टं ताम्रमम्लेन शुद्ध्यति।
रेतःस्पृष्टं शवस्पृष्टमामं कांस्यं न शुद्ध्यति ५९ दंपत्योर्विप्रयोरश्वयोर्विप्राग्न्योर्गोद्विजन्मनोः अंतरेण य
दि वा गच्छेदहोरात्रेण शुद्ध्यति ६० विनादर्भेन यत्स्नानं यच्च दानं विनोदकं असंख्यातं तु यज्जप्तं तत्स
र्वं निःफलं भवेत् ६१ आसने पादमारूढं यत्स्यादर्धं कृतं पदः मुखेन धामितं भुंक्ते तत्स्याद्गोमांससमभक्ष
णं ६२ पिबतः पतते तोयं भाजने मुखनिःसृतं अभोज्यं तद्भवेदन्नं भुक्त्वा चांद्रायणं चरेत् ६३ अपक्वमन्न
मविचस्य सप्तरात्रेण जीर्यति अन्नं व्यंजनसंयुक्तमर्द्धमासेन जीर्यति ६४ पयो दधि तु मासेन षण्मा
सेन घृतं तथा तैलं संवत्सरेणैव कोष्ठे जीर्यति वा न वा ६५ यस्तु भुंजीत शूद्रान्नं मासमेकं निरंतरं स जी
वन्नेव शूद्रः स्यान्मृतः श्वानोऽभिजायते ६६ शूद्रान्नरसपुष्टस्याप्यधीयानस्य नित्यशः जपतो जुह्वतो
वापि गतिरूर्ध्वं न विद्यते ६७ शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रं ३
प्रवर्तते ६८ शूद्रान्नेनोदरस्थेन यस्तु प्राणान्विमुंचति स भवेत्शूकरो ग्राम्यस्तस्य वा जायते कुले ६९ शूद्रा

न्नं पच्यते येन शूद्रा च गृहमेधिनी वर्जितः पितृभिर्देवैः रौरवं नरकं व्रजेत् ७० शूद्रप्रेतान्नकारी यो
ब्राह्मणो ज्ञानदुर्लभः ७१ भूमौ देयं तु तस्यान्नं यथैव श्वा तथैव सः शूद्रान्नं शूद्रसंपर्कं शूद्रेणैव सम
हासनं ७२ शूद्रान्नं ज्ञानागमः कश्चिज्ज्वलंतमपि पातयेत् शूद्रेण कृतप्रणामेन स्वस्ति चेत् क्रियते
द्विजैः ७३ शूद्रो येन नरकं याति ब्राह्मणस्तदनंतरं होमी होता च यो विप्रः शूद्रान्नान्न निवर्तते ७४ पंच
तस्य प्रणश्यंति आत्मा ब्रह्म त्रयोग्नयः ७५ शूद्रो किल्स्नं तु संस्पृष्टः प्रमादद्रव्यपाणिना न द्विजेन
भोक्तव्यमापस्तंबोऽब्रवीन्मुनिः ७६ भुंजीत ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतं वैश्यान्नमेव स्याच्छू
द्रस्य रुधिरं स्मृतं ७७ ब्राह्मणान्ने हरिद्रत्वं क्षत्रान्ने पशुना स्मृताः वैश्यान्ने च पिशुद्रत्वं शूद्रान्ने नरकं ७९
७८ व्रजेत् दुःकृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति यस्यान्नं च समश्नाति भुंक्ते तस्य च किल्बिषं
मृतकेन्नु यदा विप्रो ब्रह्मचारी विशुद्धव्रतः पिबेत्पानीयमज्ञाना भुंक्ते वान्नं स्पृशेत्तथा ८० पानीय
पाने कुर्वीत पंचगव्यस्य प्राशनं त्रिरात्रोपोषणेनान्नं भुंक्ते स्पृष्टा स्नानेन शुद्धिरिति ८१ दशाहाकुर्वतीव
प्रोक्तन्महानौ श्वयातिषु वधिः त्रिभिरेकेन तत्र विद् शूद्रयोनिषु ८२ पक्षैकं जाना बहवः पृथ
कृतेत्रेषु वर्णिनः सर्वेषां पेत्रकं शौचं यावत्त्रोपरमते पिता ८३ सूतकस्तनक पृष्ठाग द्विजं शूद्रान्नभो

ग्रं ध ५

जनं ग्रहमेवनज्ञानामिकांकांयोनिंमगच्छति अप्रोक्षाद्दशजन्मानि दशजन्मानि स्करः श्वभ
वेत्सप्तजन्मानि इत्येवमनुरब्रवीत् यस्तु नैदीक्ष होमे चाविवाहे यत्तमंडपे अंतरस्तनकोन्यो
नदोषो मनुरब्रवीत् उपनीतं यदा त्वन्नं भाजने समुपस्थितं आपांतरत्यमुत्सृष्टं न यान्नैव दो
मयेत् अन्नं भाजनसंपन्नं मक्षिकाकोशदूषिते अनंतरं स्पृशेदापस्तु चान्नं भस्मनास्पृशेत अ
रण्ये निर्जले देशे चोरव्याघ्रादिसंकुले कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति भूमौ निक्षिप्य त
द्द्रव्यं शौचं कृत्वा यथाविधि गृह्णीयात्स्वेव तद्द्रव्यमुपस्पृश्य यथाविधि मूत्रं कृत्वा व्रजन्यस्तु स्मृति
भ्रंजाजलंपिवेत् अहोरात्रोषितो भूत्वा पंचगव्येन शुद्धिरिति मूत्रोच्चारं द्विजः कृत्वा न कुर्याच्छौचमा
त्मनः मोहाद्भुक्त्वा त्रिरात्रं तु जलं पीत्वा विशुद्धिरिति यदा भोजनकाले तु अशुचिर्भवति द्विजः भूमौ नि
क्षिप्य तद्ग्रासं स्नात्वा विप्रो विशुद्धिरिति भक्षयित्वा तु तद्ग्रासमहोरात्रेण शुद्धिरिति अशित्वा सर्वमे
वान्नं त्रिरात्रेण विशुद्धिरिति यस्तु भुंजीत पंक्तिस्थाकुत्सितान्नं विशेषतः अहोरात्रोषितो भूत्वा पंच
गव्येन शुद्धिरिति एकपङ्क्त्युपविष्टानां दुष्कृतं सर्वसाधुता सर्वेनत्समतां यांति पंक्तिर्यावन्न भुंजति
अग्निना भस्मना चैव स्तंभेन उदकेन च द्वारेणाप्यथमार्गेण पंक्तिभिद्येत षड्विधा एकपंक्तिस्थि ८

तोभुंक्तेनस्पृशेच्चपरस्परं भस्मनाकृतमर्यादाएकेनपंक्तिर्नदुष्यति ९९ कृत्वापापंहिशोचन्वैब्राह्म
णोवेदपारगः स्तत्वयेविदुस्तेयोपितस्मात्पापात्प्रमुच्यते १०० नेवकुर्यात्पुनरितितिनिवृत्तान्याभवेद्य
दि बहिर्वेदागमाभ्यासात्सर्वपापंविशुद्धइति १ यथाजातबलोवह्निर्दहत्यार्द्रानपिद्रुमान् एवंद
हतिवेदज्ञःकर्मजंदोषमात्मनः १ नवेदबलमाश्रित्यपापकर्मरतिर्भवेत् अज्ञानाद्वाप्रमादाद्वा
दहनेकर्मनेतरत् २ उदकपवोदकस्थःस्थलेस्थलगतःशुचिः पादोस्थाप्योभयत्रैवआचांतो
भवतःशुचिः ३ उत्तीर्यावसृज्यउदकमवतीर्यउपस्पृशेत् एवंसश्रेयसायुक्तोवरुणेनाभिमंत्रितः ४
पादुकासनमारूढःस्वगृहात्परगृहंव्रजेत् छेदयेद्ब्राह्मणपादौतुधार्मिकःपृथिवीपतिः ५ आग्न्यागा
रेगवांमध्ये देवब्राह्मणसंनिधौ भोजनेजपकालेचपादकानांविसर्जनं । ६ अग्नीहोत्रीतपस्वीच
श्रोत्रियोवेदपारगः एतेसपादुकायांतिशेषांदंडेनताडयेत् ७ जन्मप्रभृतिसंस्कारेश्मशानांते
तथैव गणान्नेगणिकान्नेवाचारस्यबहुलोपने ८ पाचकान्नेनवश्राद्धेसग्रहेचेंदुसूर्ययोः स्त्रीणां
प्रथमेगर्भेभुक्त्वाचंद्रायणंचरेत् ८ अन्यदत्तान्तुपाकन्यापुनरन्यत्रदीयते तस्याश्चैवनभोक्तव्यं।
पुनर्भूकीर्तितानुधैः ९ एवंतुस्रवनेगर्भोयश्चैवावायसंस्कृतः द्वितीयगर्भसंस्कारःपुनरेनास्त

अ ५ सोच्यते ११ यावादौ दशभिर्वर्षैर्जीवंल्लिङ्गतगर्व(तो) यावत्तिंतं तनरेतो वै रेतोधा सा तस्योच्यते १२ मन्त्रैः
प्रायनपुत्रंघ्याचान्येषु प्रवर्तते तस्यान्नं न च भोक्तव्यं वितथकामचारिणि १३ पुनर्भूः पुनरेतावरे
तोधाकामचारिणी प्रथमे गर्वे च कृच्छ्रं चान्द्रायणं चरेत् १४ अपत्यात्तु या नारी नाश्नीयादेवनर्भेहे
च अभुंजीतेमोहात्मासूपसंनरकं व्रजेत् १५ स्त्रीधनानि च ये मोहाद् उपजीवंति बांधवाः नारीयानां
निवस्त्राणि ते पापा यांत्यधोगतिं १६ राजा चैव हरते तेजः शूद्रान्नं ब्रह्मवर्चसं सूतकान्नं च यो भुंक्ते स(
श्रा भुंक्ते पृथिवीमलं १७ असमिते सूर्ये चंडाली स्पृष्टेनेस्त्रियः नास्पृष्टा यदा किंचित्पापश्चित्तं कथं भवे
१८ त् जातरूपंस्पृष्ट्वा दापो दिवानीतं तु यज्जलं तेन स्नात्वा च पीत्वा च सर्वेस्पृष्टाशुचिर्भवेत् १९ दासना
पितगोपालकुलमित्रार्धसीरिणः एते शूद्रेषु भोज्यान्ना पश्चात्तमानं निवेदयेत् २० अन्यशूद्रेषु
अन्नाद्यं ये भुंजीत विशुधा द्विजाः प्रायश्चित्तं च संप्राप्ते चरेच्चान्द्रायणं चरेत् २१ वृषलीफेनपीतस्य
निश्वासोपहतस्य च तासु चैव प्रसूतस्य निष्कृतिर्न विधीयते २२ अजापालो महिषघ्नस्तथैव वृष
लीपतिः प्रमादादादपि संस्पृष्टा सचैलं स्नानमाचरेत् २३ रेतः तयकरी वंध्या अजास्तः प्रकी
र्तिताः तासां या पालये विप्रोहा अजापालः स उच्यते २४ महिषीत्युच्यते नारी या चैव व्यभिचारिणी (५

नदोषं त्तमते यस्तु स वै माहिष उच्यते २५ पितुर्वेश्मन्यया कन्या रजस्तु समुपस्थिते भ्रूणहत्यापि
तुस्तस्य सा कन्या वृषली स्मृता २६ माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च त्रयस्ते नरकं यान्ति दृ
ष्ट्वा कन्या रजस्वला २७ उद्वहेद्यस्तु कन्यां ब्राह्मणो मदमोहितः असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृष
लीपतिः २८ अग्रे च महिषं दृष्ट्वा मध्ये च वृषलीपतिः अन्ते वार्धुषिकं दृष्ट्वा निराशाः पितरो गताः २९
श्वित्री कुष्ठी न स्यात्तस्य कुनखी श्यावदन्तकः निराशाः पितरो यान्ति देवता ऋषिभिः सह ३० नाश्नन्ति पि
तरो देवा नाश्नन्त्यग्निहोत्रवादिनाः भार्याजितस्य नाश्नन्ति यस्य चोपपतिर्गृहे ३१ नैव लोमापजातस्य
नरको नरवाससः अंगुलानीतकर्णस्य भुञ्जते नो पितरो हविः ३२ यावदुष्णं भवेदन्नं यावद्भुञ्जति वा
ग्यतः तावदश्नन्ति पितरो यावन्नोक्ता हविर्गुणाः ३३ हविर्गुणा न वक्तव्याः पितरो यत्र तर्पिताः पितृ
भिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ३४ यावद्विप्रान्न भुञ्जन्ते हव्यकव्येषु मंत्रवित् तावन्नो यस्त्व
ते प्रेतपदी प्राप्तमूलानयो मयात् ३५ यावद्विप्रान्न भुञ्जन्ते अन्नदानं हिरण्ययोः तावच्चीर्णं व्रतस्या
पितृत्वापं न प्राप्नुते ३६ यदि स्पृश्या काकबलाकयो वा अमेध्यलिप्तं च भवेच्छरीरं आत्रेय स्नानेन
प्रविशोधनं सम्यक् स्नानेन लोपापहृतस्य शुद्धिः ३७ अभक्ष्याणामपेयानां अलेह्यानां च भक्षणे

अं तोमूत्रपुरीषाणांप्रायश्चित्तंकथंभवेत् ३८ पत्रोदुंबरबिल्वानांकुशाश्वत्थपलाशयोः एतेषामुद
९ कंपीत्वाषड्रात्रेणविशुद्ध्यति ३९ येप्रत्यवसिताविप्राप्रव्रज्याग्निजलोद्धृताः अनाशकंनिवृत्ताश्च
6 गृहस्थत्वंचिकीर्षति ४१ सचरेत्त्रीणिकृच्छ्राणित्रीणिचांद्रायणानिच जातकर्मविधिंकृत्वापुनःसं
स्कारमर्हति ४२ त्वलकाचोपधानंच पुष्परक्तांबराणिच शोधयित्वार्कतापेनप्रोक्षणेनविशुद्ध्य
ति देशंकालंतथात्मानं द्रव्यंद्रव्यप्रयोजनं उपपत्तिमवस्थांच ज्ञात्वाकर्मसमाचरेत् ४३ रथ्याक २
र्दमतोयानिनानामध्यस्थितृणानिच मारुतार्केनशुध्यंति पक्वेष्टकचितानिच ४४ आतुरेस्नानउत्पन्ने
दशकृत्वोह्यनातुरः स्नात्वास्नात्वास्पृशेदेनंततःशुद्ध्येत्सआतुरः ४५ स्पृष्ट्वारजस्वलान्योन्यंब्रा
ह्मणीक्षत्रियातथा कृच्छ्रमेकंचरेत्पूर्वापादमेकंतथोत्तरा ४६ उपवासैस्त्रिभिर्वापिअहोरात्रेणवो
त्तरा ४० एवंपानकनिर्दिष्टमंगिरामुनिरब्रवीत् स्पृष्ट्वारजस्वलान्योन्यंवैश्याचशूद्रिणीयदि कृच्छ्रे
णशुद्ध्यतेपूर्वाशूद्रादानेनशुद्ध्यति ४८ रजस्वलातुसंस्पृष्ट्वाचंडालवायसैः भुक्तास्तेतानुपवसेत
मानस्तोकमूत्रंजपेत् ४९ अज्ञानेनैवविप्रेणस्पृष्टाचैवरजस्वला प्राजापत्येनकृच्छ्रेणप्राणायाम
शतेनच ५० दिवाकीर्तिमुदक्यांचपतितंसूतिकंतथा सशवस्पर्शनेचैवस्पृष्टाचस्नानेनशुद्ध्यति। ५१

दिवा हते न तोयेन तापस्तेनाग्निसन्निधौ दिवा नार्केण संस्पृष्टा रात्रौ नक्षत्रमालिनी ५२ मध्ययोरुभ
योश्चैव पवित्रं सर्वदा जलं ५३ व्यातं वा पतितं वाथ कूपः प्रणालस्थापस्तु वा क्वचित्‌ षष्ठी चानेन तथा चैव त्रुटिं
डे गोमयेन तु उपलेपेन शुध्यंति ५४ अंगिरा मुनिरब्रवीत्‌ गोमूत्रं गोमयं क्षीरं दधि तक्रं तथा घृतं
गोपुच्छं पश्चिमे भागे एते सर्वे पवित्रकाः ५५ एवं नेकविधं सर्वं प्रमादाज्ञानविस्तरः यत्र यत्र मृता
गावः प्रायश्चित्तं पृथक्‌ पृथक्‌ ५६ गवां च पतने कृच्छ्रं पाषाणे चतुर्थं चरेत्‌ अर्द्धकृच्छ्रं तु वाप्यां स्या
त्पादकृच्छ्रं तु कूपके ५७ शस्त्रहत्या त्रीणि कृच्छ्राणि यष्टिघाती द्वयं चरेत्‌ योजने पादहीनं स्याद्ब
न्धे सर्वं निपातिते ५८ न स्त्रीणां वपनं कुर्यात्‌ न चैव गानमनुव्रजेत्‌ न च रात्रौ भवेद्गोष्ठे न कुर्यात्‌ दैहि
कीं क्रियां ५९ लांगूलकेदने पादे तथा चैवानुधारणे पादहीने शिखावर्ज्जं सशिखं च निपा
तने ६० एवमेव तु नारीणां मुंडमुंडापनं स्मृतं एकीकृत्य कचान्सर्वान्छेदयेदंगुलद्वयं ६१ अ
नुच्छिष्टेन संस्पृष्टो येन चाचमनं व्रजेत्‌ तेनैवोच्छिष्टसंस्पृष्टस्त्रिरात्रेण विशुद्धिति ६२ शवस्
ते सप्तरात्रे स्नानकं तु भवेद्यदि शिवेन शुद्धिते स्नानिनं स्नान्यां शुद्धिर्नेशावं ६३ स्नानके न तु
जाते न उभाभ्यां स्नानकं यदि पातकेन तु लिप्येन स्नानके नैव गच्छति ६४ सम्यक्‌ पिंडादतिक्र

अं
७

कुंत्तप्राजापत्यंचगोमये एकपादंचरेद्गोधेद्वौपादौबंधनेचरेत् ६५ सर्वंव्रजेष्वनिर्दिष्टंपश्चात्त्स
तकिनोभवेत् चीर्णेव्रतेतुनिर्दिष्टंपश्चाद्ब्राह्मणभोजनं ६६ अधीतेयइदंशास्त्रमुक्तमंगिरासव
यं अक्षीणांसन्निधौविप्रः सर्वपापैःप्रमुच्यते ६७ इतिश्रीअंगिराप्रोक्तंधर्मशास्त्रंसमाप्तं

१०८६

७